मन्त्रणमाह नारदः “त्वं वेत्सि सर्वभूतानां पापानि सुकृतानि च। त्वमेव देवि ! जानीषे न विदुर्यानि मानवाः। व्यवहाराभिशस्तोऽयं मानवस्तोल्यते त्वयि। तदेनं संशयारूढ़ं धर्मतस्त्रातुमर्हसि। देवासुरमनुष्याणां सत्ये त्वमभिषिच्यसे। सत्यसन्धोऽसि भगवन् ! शुभाशुभविभावने। आदित्यचन्द्रावनिलोऽनलश्च द्यौर्भूमिरापो हृदयं यमश्च। अहश्च रात्रिश्च उभे च सन्ध्ये धर्मश्च जानाति नरस्य वृत्तमिति”। मन्त्रोच्चारणानन्तरकर्त्तव्यं पितामह आह ‘‘ज्योतिर्विद्ब्राह्मणश्रेष्ठः कुर्य्यात्कालपरीक्षणम्। विनाड्यः पञ्च विज्ञेयाः परीक्षाकालकोविदैः। साक्षिणो ब्राह्मणाः श्रेष्ठाः यथादृष्टार्थवादिनः। ज्ञानिनः शुचयोऽलुब्धा नियोक्तव्या नृपेण तु। शंसन्ति साक्षिणः श्रेष्ठाः शुद्ध्यशुद्धी नृपे तदा’’ इति।

कानि पुनर्जयपराजयचिह्नानीत्यपेक्षायामाह नारदः “तुलितो यदि वर्द्धेत विशुद्धः स्यान्न संशयः। समो वा हीयमानो वा न विशुद्धो भवेन्नरः’’ इति वर्द्धेत उपरि गच्छेत्। हीयमानः अधो गच्छेत्। यत्पुनरुक्तं पितामहेन “तुलितो यदि वर्द्धेत शुद्धो भवति धर्मतः। हीयमानो न शुद्धः स्यादेकेषान्तु समोऽशुचिः। अल्पपापः समो ज्ञेयो बहुपापस्तु हीयते’’ इति। अल्पत्वं व्यभिचारे समालिङ्गनादिना” चौर्य्ये तद्देशगमनादिना तत्र एकेषामिति पूजार्थं न तु स्वमते समस्य शुचित्वद्योतनार्थम् अल्पपापिनोऽप्यशुचित्वात्। तेन हीयमानसमयोर्न कश्चिद्विशेषः। दण्डप्रायश्चित्ते पापविशेषस्तयोर्दोषानुसारित्वात्। यत्तु कैश्चिदेकेषं तु समोऽशुचिरिति वचनम्। “अल्पपाषः समो ज्ञेयः”इति वचनं साम्ये संशयपरमेवेत्युक्तन्तत्क्लिष्टकल्पनया वाक्यानार्जवन्त्वैरुपेक्षणीयम्। यत्तूक्तम्, बृहस्पतिना “घटेऽभियुक्तस्तुलितो हीनस्तद्धानिमाप्नुयात्। तत्समस्तु पुनस्तोल्यो वर्द्धितो विजयी भवेदिति’’ अयमर्थः पुनर्देवतावाहनाद्यसहितं सर्वं कर्म विधायोत्तोलनीय इति समस्याशुचित्वनिश्चयो न प्रथमतोलनपर्य्याये कार्य्यः। किन्तु पुनस्तोल्यमानस्य समतैव यदि भवति तदा अशुद्धिरवधारणीयेत्यर्थः इति स्मृतिचन्द्रिकायाम्। यत्तु कैश्चित्तस्मिन्नेव प्रयोगे तोलनमुक्तं तन्मन्दं प्रधानावृत्त्यावङ्गावृत्तिरिति न्यायेन तोलनस्य फलसम्बन्धेन प्रधानत्वात् तदावृत्तौ देवतावाहनाद्यङ्गानामप्यावृत्तेरेवोचितत्वात्। शिक्यादिच्छेदेऽपि पुनः समीकृत्य तोलनीय इत्याह कात्यायनः “शिक्यच्छेदे तुलाभङ्गे तथा चापि गुणस्य वा। शुद्धेस्तु संशये चैनं परीक्षेत पुनर्नरमिति” शुद्धिसंशयकारीण्याह नारदः ‘‘तुलाशिरोभ्यासुद्भ्रान्तं विचलं न्यस्तलक्षणम्। यदा वायुप्रणुन्नं वा तदा नैकतरं वदेत्’’ इति। अयमर्थः। यदा तुलान्तौ तिर्य्यक्चलितौ यदा च समताज्ञानार्थन्यस्तं चिह्नमपैति यदा च वायुना प्रेरिता तुला ऊर्द्ध्वमधश्च कम्पते तदा जयं पराजयं च न वदेदिति। व्यासोऽपि ‘‘कक्षच्छेदे तुलाभङ्गे घटकर्कटयोस्तथा। रज्जुच्छेदेऽक्षभङ्गे वा दद्याच्छुद्धिं पुनर्नृपः’’ इति। कक्षं शिक्यतलं कर्कटौ तुलोपान्तस्थौ शिक्याधाराविषद्वक्रौ कर्कटशृङ्गसन्निभौ लौहकीलकौ। अक्षः पादस्तम्भयोरुपरिनिहितस्तुलाधारपट्ट इति मिताक्षरा। दार्ढ्यप्रयोजकः कीलक इति हलायुधः। यत्तु बृहस्पतिवचनम् “कक्षच्छेदे तुलाभङ्गे घटकर्कटयोस्तथा। रज्जुच्छेदेऽक्षभङ्गे च तथैवाशुद्धिमाप्नुयादिति” तदाऽऽकस्मिककक्षच्छेदादिविषयम्। कात्यायनवचनन्तु दृश्यमानकारणकशिक्यच्छेदादिविषयमिति विज्ञानेश्वराचार्य्यादयः’’ वीरमि०। तुलापुरुषाख्यतुला तु हेमाद्रौ दा० खण्डे दृश्या। मत्कृतकृततुलादानादिपद्धतौ च विस्तरेण दृश्या।

८ तोलने मिता०। ‘‘तुलाः स्त्रियां पलशतं भारः स्याद्विंशतिस्तुला इत्यमरोक्तेः पलशतमानं तुला। तत्र सादृश्ये “तुलां यदा रोहति दन्तवाससा,” कुमा० “कामयानसमस्यया तुलाम्” रघुः। तुलोपमाशब्दयोगे षष्ठ्येव साधु न तु तृतीया “अतुलोपमाभ्याम्” पा० तृतीयाविधाने तयोः पर्य्युदासात् तृतीयाप्रयोगस्तु सहार्थशब्दाध्याहारेण तद्योगे इति मल्लि०। तुलाराशौ। “कन्यार्के च तुलार्के च पितॄणां श्राद्धमिष्यते” स्मृतिः “तुलायां लीलया सह” ति०त०। “सहभाषस्तुलया” ज्यो०त०। तोलनदण्डात्मके माने ‘‘अथ स दक्षिणादूरोरुत्कृत्य स्वमांसपेशीं तुलया धारयन् गुरुतर एव कपोत आसीत्” भा०व०१९६ अ०। ‘‘तुलामानं प्रतीमानं सर्वञ्च स्यात् सुलक्षितम्। षट्सु षट्सु च मासेषु पुनरेव परीक्षयेत्’’ मनुः ‘‘तुलामानं सुवर्णादीनां परिच्छेदार्थं यत् क्रियते प्रतीमानं प्रस्थद्रोणादि तत्सर्वं स्वनिरूपितं यथा स्यात् षट्सु षट्सु मासेषु गतेषु पुनस्तत्सर्वं सभ्यपुरुषैर्नृपतिः परीक्षयेत्” कुल्लू० “आषाढ्यां तुलया वीजतोलने भाविशस्यहानिवृद्धिज्ञापनम् वृ० स० २६ अ० उक्तं तत्र अधिवासनाङ्गतुलानिर्माणप्रकारस्तत्रैवोक्तो यथा